CC-0. In Public Domain. Digitization by eGangotri

विकरणादि प्रकरण विमर्श :

तीर्थै स्वपक्षगुहेषा— १४

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

विवरणादिप्रस्थानविमर्शः

वीरमणिप्रसाद उपाध्यायः

१९५४

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मुद्रकः—

विद्याविलास प्रेस,

बनारस–१

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राक्कथनम्

साधारणतयाऽद्वैतवादः शाङ्करमतनाम्नैव प्रख्यातोऽस्ति । वस्तुतः समानकोटिकलनीयाः प्राधान्येन चत्वारोऽद्वैतवादा भारतीयदर्शनशास्त्रेषूपलभ्यन्ते—(१) शब्दाऽद्वैतवादः, (२) शाक्ताऽद्वैतवादः, (३) ब्रह्माऽद्वैतवादः, (४) शिवाऽद्वैतवादः । ब्रह्माऽद्वैतवाद एव शाङ्कराऽद्वैतवादतया प्रसिद्धः । शाङ्कराऽद्वैतवादिषु मुख्यतयाऽवान्तरमतभेदरूपेण शाखात्रयमप्रस्थानत्रयं वा (Three important schools of interpretators) दृग्गोचरतामुपयाति । प्रस्थानत्रयस्य नामानि—(१) प्रतिबिम्बवादः, (२) आभासवादः (३) अवच्छेदवादः । प्रतिबिम्बवादस्य प्रवर्त्तयिता शङ्कराचार्यशिष्यः पद्मपादाचार्यस्तदनु पञ्चपादिकाविवरणकारः प्रकाशात्मा च । आभासवादस्य प्रवर्त्तकः शङ्कराचार्यशिष्यः सुरेश्वराचार्यो यो वार्त्तिककारनाम्नाऽपि प्रसिद्धः । यद्यपि अवच्छेदवादोपोद्वलकाः सिद्धान्तामण्डनरचितब्रह्मसिद्धौ प्रायशः समासाद्यन्ते, तथापि अवच्छेदवादस्य प्रवर्त्तको भामतीकारो वाचस्पतिमिश्रमहोदय एव मन्यते यतः स एव शाङ्करमतदिशाऽवच्छेदवादस्पूर्णरूपेण व्यवास्थापयत् ।

प्रस्थानत्रयमतानि कुत्राऽप्येकस्मिन् ग्रन्थेऽद्यावधि न सङ्गृहीतानि सुपरीक्षितानि च । इमामेवावश्यकतां मनसि निधार्य पुस्तकस्याऽस्य प्रकाशने प्रयासो व्यधायि । ग्रन्थेऽस्मिन् मुख्यस्थलेषु मतानि विविच्य ग्रथितानि । यत्र कुत्रापि नवनवाः परिष्काराः प्रदर्शिताः । आशासे यदयं बालानामुपकाराय गुणग्राहिणां विपश्चितां सन्तोषाय च सम्पत्स्यते ।

३१-७-५४ वीरमणिप्रसाद उपाध्यायः

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

विवरणादिप्रस्थानविमर्शः

ॐ **'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन'** इति श्रुतेस्सर्वेषां सुकृतानां ब्रह्मजिज्ञासा-पर्यवसायित्वात्तेषां पुण्यतमत्वं विपश्चितां येषां ब्रह्मविचारणे मतिर्जायेतेति सुव्यवस्थितम् । उक्तञ्च :—

स्नातं तेन समस्ततीर्थसलिले दत्ता च सर्वावनि-
र्यज्ञानाञ्च कृतं सहस्रमखिला देवाश्च सम्पूजिताः ।
संसाराद्धि समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥ १ ॥

ब्रह्मविचारस्यावश्यकता च आत्मनः पारमार्थिकस्वरूपज्ञानेन ब्रह्मजीवैक्यात्मकेन संसारबन्धपरिहाणम् । तत्र **'स्वप्रकाशपरमानन्दरूपे आत्मनि सर्वसंसारधर्माऽसंसर्गिणि विवेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वप्रतिभासो बन्धः'**, येन वस्तुतः केवलः संसारोत्तीर्णोऽपास्तसमस्तविशेषश्शुद्धसच्चिदानन्दरूपोऽपि जीवः संसारलग्नमात्मानं मत्वा सर्वविधसंसारक्लेशभाजनमनुभवति । रज्जुसर्पादिवद् ब्रह्मणि स्वप्रकाशेऽध्यस्ततया जगदिदं सत्यमिवाभाति । अध्यासलक्षणं— 'सत्यानृते मिथुनीकृत्य'-इति भगवद्भाष्यकारवचनानुरोधेन-**सत्यानृतवस्तुसम्भेदावभासः, परत्र परावभासो वाऽध्यासः ।** एवञ्च

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यथा रज्जौ सर्पभानोत्तरकाले भयं भवति, दीपेन रज्जुरितिज्ञाने भयं निवर्त्तते तथैव संसारो मिथ्याभूतोऽपि विवेकापेतस्य पुरुषस्य सत्यो भाति, अत एव च तस्य बन्धो भवति।। तत्त्व-ज्ञानदीपेन व्यपेतसंसार-सत्यत्वान्धकारः स बन्धान्मुच्यते।

अज्ञानेन संसारो भवति ज्ञानेन च मोक्ष इत्यत्र रज्जुसर्पशुक्ति-रजतादिकमुदाहरणं वेदान्तग्रन्थेषु समुपन्यस्तम्। तत्रेयती सामग्र्य-पेक्षिता—एका रज्जुरपरो द्रष्टा एको जीवोऽज्ञानं सन्दालोकादिकञ्च। सर्प-ज्ञानमपि प्राक्तनमपेक्षितं, यतः सर्पज्ञानं विना भ्रमो भयं वा नोपपद्यते। तत्रेदं विचारणीयं—किं वस्तु रज्जुस्थानापन्नं को द्रष्टा को दीपः कस्सर्पः कथमन्याश्च सामग्र्यः सङ्गच्छन्ते? किञ्च सर्पमात्रं मिथ्या दृष्टान्ते परन्तु रज्जुर्द्रष्टा दीप इतित्रयं वस्तु पृथक् सत्यमद्वैतमते तु ब्रह्मैव सत्यं तद्व्यतिरिक्तं द्वितीयं किमपि नास्तीति सर्वथा विषमो दृष्टान्तः। अत्रोच्यते—अद्वैतमते वस्तुत एकमपि ब्रह्मोपाधिभेदान्नानारूपं प्रतिभासते—यथोक्तम्—

'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्'।
'एक एव हि भूतात्मा भूते भूते व्यवस्थितः',।
'अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपम्प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपम्प्रतिरूपो बभूव',।
'एको देवः सर्वभूतेषु गूढः, सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः, साक्षी चेता केवलो निर्गुणश्च'।
'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्'।
'अहमात्मा गुडाकश सर्वभूताशयस्थितः'।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि' ।
त्वं कुमार उत वा कुमारी त्वं जीर्णो दण्डेन वञ्चसि ।

इत्यादि श्रुतिस्मृतिवाक्यशतैश्चैकस्यैव ब्रह्मण उपाधिभेदान्नानारूपताभिधानात्, परमार्थतस्त्वद्वैतमेव **'एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन'**–इत्यादिश्रुतेश्च। यथा रज्जौ सर्पाद्यध्यासस्तत्फलं भयकम्पादिकं तथैव ब्रह्मात्मनि शरीरित्वाद्यध्यासस्तत्फलं बन्धादिकम्, यथा रज्जुज्ञानेन सर्पाध्यासस्तत्फलं भयकम्पादिकञ्च निवर्तते तथा ब्रह्मात्मज्ञानाच्छरीरित्वाद्यध्यासस्तत्फलं जन्मादिबन्धश्च निवर्तते–**'तमेव विदित्वाऽतिमृत्युमेति'**–इतिश्रुतेः। एवञ्च रज्जौ सर्पाध्यासेऽधिष्ठानं रज्जुः पुरुषो द्रष्टा सर्पज्ञानमपरमिति त्रयमपेक्षितं न तु दीपोऽपि तस्याध्यासनिवर्तकत्वादत्र तु एकं ब्रह्मैवाध्यासाधिष्ठानं तस्यैवाज्ञानाधिष्ठानत्वात् तद् ब्रह्मैव स्वाऽज्ञानेन वस्तुतः सर्वदा मुक्तमपि स्वस्मिन् बन्धाध्यासं पश्यति स्वरूपज्ञानेन च मुक्तिमाप्नोति ।

सर्पज्ञानं तु सर्पाध्यासे न कारणमव्यवहितस्यैव कार्ये कारणत्वं भवति न तु व्यवहितस्यापि' अन्यथा नष्टदण्डचक्रकुलालादेरपि घटकारणत्वं स्यात्, नष्टमृत्पिण्डस्याप्युपादानता स्यात्। सर्पाच्चक्षुर्वियोगे सर्पज्ञानं नश्यति सर्वस्यापि ज्ञानस्य विषयवियोगे नाशात्। सर्पज्ञानात्तु वर्षादिव्यवधानेऽपि रज्जौ सर्पाध्यासो जायते। अतो रज्जुसर्पाध्यासे सर्पज्ञानजन्यस्संस्कार एव हेतुस्तस्याव्यवहितत्वेन नियतपूर्ववृत्तित्वात्। ज्ञाननाशोत्तरकाले संस्कार एव तिष्ठति यथा यज्ञनाशोत्तरमपूर्वं तिष्ठति। तदेवं यथाऽपूर्वं स्वर्गकारणं, तथा सजातीयवस्तुज्ञानजः संस्कारोऽत्रापि संभवति पूर्वपूर्वमिथ्याबन्धाऽध्याससंस्कारा-

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

णामुत्तरोत्तरबन्धाऽध्यासे हेतुत्वात्। तदुक्तम् परिमले:—सर्वेष्वप्य-ध्यासेषु पूर्वपूर्वभ्रमजनितसंस्कारसचिवाऽविद्योपधानमेव प्रयोजकम्।

यत्तु किं रज्जुस्थानापन्नमित्यादि चेद् ब्रह्मैव रज्जुस्थानापन्नं द्रष्टाऽपि तदेव, सर्पस्थानापन्नं जगद्, प्रदीपो वृत्तिज्ञानं तदपि वृत्त्यारूढं चैतन्य-मेव। किंच यथा स्वप्नावस्थायां निद्रायुक्तः पुरुषः स्वयमेव स्वस्मि-न्नानाविधं जगत् पश्यति, स्वस्मिन्नेवारोपितव्याघ्रादिभ्यो बिभेति च, पुनः स्वप्नं विहाय जाग्रदशायामेक एव तिष्ठति तथा ब्रह्मैवैकं वस्तु स्वाज्ञानेन संसारं स्वस्मिन्नारोपितं पश्यति तत्त्वबोधेन वृत्त्यात्मकेनाज्ञानं विनाश्य संसारं चापि विहाय स्वयमेकमेव तिष्ठतीति सर्वमनवद्यम्।

एवं स्थूलदृष्ट्या प्रश्नानुरूपेणोत्तरमिदं शास्त्ररीत्या तु प्रश्नोत्तरं वितन्यते। नन्वहङ्कारादिबन्धो यदि रज्जुसर्पवन्मिथ्या स्यात्तदा ज्ञानेन निवृत्तिं यायात् आत्मन्यध्याससामग्र्यभावाद् बन्धप्रतीतेश्च बन्धः सत्य एव। सत्यपदार्थज्ञानजः संस्कारः, प्रमातृप्रमाणप्रमेयगता दोषाः, अधिष्ठानसामान्यज्ञानं विशेषरूपेण तदज्ञानं चायं सर्वसमाजोऽध्यास-सामग्रीस्तया विनाऽध्यासो न भवति। शुक्तौ रजतस्य रज्जौ सर्पस्या-ध्यासस्तस्य पुरुषस्य भवति येन सत्यं रजतं सत्यस्सर्पश्चेति द्वयं दृष्टं नान्यस्याऽतस्सत्यवस्तुज्ञानजस्संस्कारोऽध्यासहेतुः। शुक्तौ सर्पस्य रज्जौ रजतस्य अध्यासो न भवत्यतः प्रमेयगतसादृश्यदोषोऽध्यासहेतुरेवं प्रमातृगतलोभभयादिदोषो नेत्रादिप्रमाणगतकाचकामलादिदोषश्चाध्यास-हेतुः। शुक्ताविदमाकारेण सामान्यज्ञानं स्याच्छुक्तिरियमिति विशेषा-कारेण ज्ञानं न स्यात्तदाऽध्यासो भवति, अतोऽधिष्ठानसामान्यज्ञानं विशेषाऽज्ञानं चाध्यासकारणमितीयती सामग्र्यध्यासेऽपेक्षिता। एषु

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

पदार्थेष्वन्यतमाभावेऽप्यध्यासो न संभवति, यथा मृच्चक्रकुलालादिवस्तु-

CC-0. In Public Domain. Digitization by eGangotri

जातं घटे कारणं तेषामन्यतमस्याप्यभावे घटो न जायते। आत्मनि बन्धाध्यासे किमपि कारणं नास्ति। प्रथमतो बन्धः कश्चित्सत्यस्स्यात्तदा तज्ज्ञानजन्यसंस्कारेणात्मनि मिथ्याबन्धः प्रतीयेत। सिद्धान्ते त्वात्मभिन्नं किमपि सत्यं नास्ति **'एकमेवाद्वितीयं नेह नानास्ति किञ्चन'** इत्यादिश्रुतेरतस्सत्यज्ञानजन्यसंस्काराभावादात्मनि बन्धाध्यासो न सम्भवति। आत्मनोऽहङ्कारादिबन्धस्य च सादृश्यमपि नास्ति प्रत्युत तमःप्रकाशयोरिव विरुद्धस्वभावत्वाद् विरोध एव। आत्मा प्रत्यगिति बन्धः परागित्युच्यते; आत्मा प्रकाशको बन्धश्च प्रकाश्यः। प्रत्यक्पराचोः प्रकाशकप्रकाश्ययोश्च देहपुत्रयोरिव दीपघटयोरिव च विरुद्धस्वभावतया परस्पराऽध्यासाऽसंभवात् चक्षुर्घटयोरिव विषयिविषययोश्च विरुद्धस्वभावत्वादात्मबन्धयोरध्यासो न भवति। तथा प्रमातृप्रमाणयोरपि दोषोऽत्रात्मनि बन्धाध्यासे न सम्भवति, प्रमात्रादेरेव बन्धस्वरूपतयाऽध्यासात्मकत्वादिति वेदान्ते सिद्धान्ततत्वात्। एवं रीत्या बन्धाध्यासात्पूर्वं प्रमात्रादेस्स्वरूपस्यैवासिद्धत्वात्तद्दोषस्याप्यसिद्धत्वाद् बन्धाऽध्यासो न सम्भवति। अधिष्ठानस्य विशेषरूपेणाऽज्ञानमपि न सम्भवति, बन्धाध्यासाधिष्ठानस्य ब्रह्मणः स्वप्रकाशज्ञानरूपत्वेन तत्र रवौ तम इवाऽज्ञानाऽसंभवात् चैतन्यप्रकाशाऽज्ञानतमसोरन्योऽन्यविरोधाच्च, तत्राभ्युपगमेऽप्यज्ञानेऽध्यासो न भवति अत्यन्ताज्ञातेऽधिष्ठाने ज्ञाते च तस्मिन्नध्यासाभावात्, विशेषात्मनाऽज्ञाते सामान्यात्मना ज्ञातेऽचाधिष्ठानेऽध्यासात्, ब्रह्मणश्च निर्विशेषताऽभ्युपगमात् सामान्यविशेषशून्यतया कथमध्यासः। अध्यासलोभेन तत्र सामान्यविशेषताभ्युपगमे सिद्धान्तो व्याहन्येत। एवं रीत्या निर्विशेषे प्रकाशात्मके ब्रह्मणि विशेषात्मनाऽज्ञातत्वस्य सामान्यात्मना ज्ञातत्वस्य

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitized by eGangotri

चाभावात्तस्मिन् बन्धाध्यासो न भवत्यतो बन्धोऽध्यासात्मको मिथ्येति कथमपि न सम्भवति किन्तु बन्धस्सत्योऽतो ज्ञानेन न निवर्तते सत्यस्य ज्ञाननिवर्त्यत्वाभावात्। अतो ज्ञानद्वारा सकार्याज्ञाननिवृत्तिः परमानन्दावाप्तिश्च मोक्षो जायत इतिवेदान्तमतससमीचीनम्।

कर्मणा मोक्षो भवति। 'कुर्वन्नेवेह कर्माणि', 'कर्मणैव हि संसिद्धि-मास्थिता जनकादय' इति श्रुतिस्मृतिवाक्येभ्य इति चेन्न बन्धो मिथ्या-त्वाज्ज्ञानेनै वनिवर्तते 'ऋते ज्ञानान्न मुक्तिः', 'ज्ञानादेव तु कैवल्यम्' 'नान्यः पन्था विद्यतेऽयनाय' 'तमेव विदित्वाऽतिमृत्युमेति', 'ज्ञानेन तु तदज्ञानं, येषां नाशितमात्मनः—इत्यादिश्रुतिस्मृतिवाक्येभ्यो ज्ञान-निवर्त्यत्वमेव बन्धस्य श्रुतत्वाद्बन्धोऽध्यासात्मको रज्जुसर्प इव शुक्तिर-जतमिव च मिथ्यैव। यच्चोक्तं सत्यवस्तुज्ञानजः संस्कारोऽध्यासहेतु-रिति तन्न सजातीयवस्तुज्ञानजन्यसंस्कारोऽध्यासहेतुरित्यस्यैव सम्भवात्। सत्यवस्तुज्ञानजन्यसंस्कारस्यैव हेतुत्वे मिथ्यावस्तुज्ञानजन्यसंस्कार-स्याहेतुत्वे चादृष्टसत्यरजतस्य दृष्टमायाविनिर्मितरजतस्य च शुक्तौ रजताध्यासाऽनुपपत्तिस्तस्य सत्यरजतज्ञानजसंस्काराभावात्। भवत्येव मिथ्यारजतज्ञानजसंस्कारवतोऽपि शुक्तिरजताध्यासो मायाविनिर्मितसर्प-ज्ञानजसंस्कारवतोऽपि च रज्ज्वां सर्पाध्यासोऽतः सत्यवस्तुज्ञानजन्य-संस्कारोऽध्यासहेतुरिति न नियमः किन्तु सजातीयवस्तुज्ञानजन्यः संस्कारोऽध्यासहेतुरित्येव नियमः। संस्कारजनकं ज्ञानं तद्विषयश्चेति द्वयं सत्यं स्यान्मिथ्या वा स्यादित्यत्र नाग्रहो मिथ्यावस्तुज्ञानजसंस्का-रस्याप्यासहेतुत्वप्रतिपादनात्। स चात्मनि बन्धाध्यासेऽपि संभ-

Digitized by Arya Samaj Foundation Chennai and eGangotri Kaundinyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बन्धो रज्जुसर्प इव वस्तुतः प्रातिभासिक एव प्रतीतिभिन्नकालेऽप्रतीयमानत्वात् प्रतीतिकाल एव च प्रतिभासात् 'अविद्यायोनयो भावास्सर्वेऽमी बुद्बुदा इव। क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधौ लयम्' इति वेदसम्मितवचनात्। अत एव सुषुप्तौ सर्वप्रपञ्चाभावो निरूपितः 'अत्र माताऽमाता पिताऽपिता भवति इति श्रुतेः', 'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं तत्सुषुप्तम्' इति श्रुतेश्च। अयमेव दृष्टिसृष्टिवाद इत्युच्यते। एवं रीत्याऽनेक एवाहङ्कारादयो जायन्ते प्रलीयन्ते च तेषां ज्ञानान्यप्येवं जायन्ते प्रलीयन्ते च। ज्ञानेन सहैवाहङ्कारादीनामुत्पत्तिर्भवति ज्ञानाभावे तेषामभावो भवति। यदाऽहङ्कारादीनां ज्ञानं जायते तदा तेषां जन्म भवति यदा तेषां ज्ञानं विलीनं भवति तदा तेषामपि विलयो भवतीत्येवमहङ्कारादेः प्रतीतिमात्रशरीरत्वम् अहङ्कारस्य तत्प्रतीतेश्चाध्यासत्वं मिथ्यात्वमिति यावत्। एवमुत्तरोत्तरमहङ्कारादेस्तज्ज्ञानस्य च योत्पत्तिस्तद्धेतुः पूर्वपूर्वमिथ्याहङ्कारादिज्ञानजन्यः संस्कारः सम्भवत्येव।

नन्वेवमुत्तरोत्तराहङ्काराध्यासे पूर्वपूर्वाऽहङ्कारजसंस्कारो हेतुर्भवतु प्रथमाहङ्कारे तज्ज्ञाने च का गतिः, ततः पूर्वस्याहङ्कारादेरनुत्पन्नतया तत्संस्कारस्याप्यभावादेवं सर्वस्य वस्तुजातस्य प्रथमाध्यासे संस्कारो हेतुर्न सम्भवति इति चेन्न **प्रपञ्चप्रवाहस्यानादित्वात्**। प्रपञ्चः प्रवाहरूपेणाऽनादिरेव। अनादिकालादारभ्यैवंविधः कालः संसारदशायां न समागतो, यस्मिन्काले कोऽपि घटो नाभवदतो घटप्रवाहोऽनादिस्तथैव सर्वस्य वस्तुमात्रस्य प्रवाहरूपेणानादितया संसारोऽनादिरेव, प्रलयदशायामपि सुषुप्ताविव तस्य संस्कारात्मनाऽवस्थानात्–**'धाता यथापूर्वमकल्पयद्दिवञ्चाऽन्तरिक्षं'** इत्यादिश्रुतेः। प्रपञ्चस्यानादित्वादहङ्कारादि-

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri

वस्तुमात्रस्याध्यासो नैवानुपपद्यते, कोऽपि सर्वस्मात्प्रथमो नास्ति किन्तु स्वपूर्वपूर्वाध्यासात्सर्वस्योत्तरोत्तरत्वमेव ज्ञातव्यमित्येवं सजातीयपूर्वपूर्वाहङ्कारादिज्ञानजन्यसंस्काराद्यनात्मवस्तुनोऽध्यासः सम्भवति ।

यच्चोक्तं प्रमात्रादिगतदोषोऽध्यासहेतुस्तन्न प्रमात्रादिदोषमन्तरेणाऽप्यध्याससंभवात् । दृश्यते हि यद् द्विजोऽस्मि, ब्राह्मणोऽस्मीत्यात्मनि जातेरध्यासो भवति आत्मना सह जातेस्साद्दश्यलेशविरहेऽपि । तस्मात् प्रमेयगतसाद्दश्यदोषो नाध्यासहेतुर्जातेः स्थूलदेहधर्मत्वाद्बाह्यवस्तुत्वादात्मनश्च सर्वान्तरत्वात् । यदि प्रमेयगतसाद्दश्यदोषोऽध्यासहेतुतयाऽवसीयेत तर्ह्यात्मनि जातेरध्यासो न स्फुरेत्, भवति च तथाऽध्यासो द्विजोऽस्मीत्याद्यध्यासस्य प्रसिद्धत्वात् । यथा शुक्तौ रजतं नास्ति भ्रान्त्या प्रतीयते तथा आत्मनि तत्त्वतो जातिर्नास्ति किन्तु भ्रान्त्या प्रतीयते अतश्शुक्तिरजतवदात्मनि जातेरध्यास एव । आत्मा व्यापकोऽस्ति जातिश्च परिच्छिन्नपदार्थः आत्मा प्रकाशको जातिश्च प्रकाश्यपदार्थोऽतस्तयोस्साद्दश्याभावेऽपि यथात्मनि जातेरध्यासस्तथाऽहङ्काराद्यनात्मनोऽपि साद्दश्यमन्तरेणैव कथं नाध्यासः । अपरञ्च साद्दश्यदोषो न कथमपि सामान्यतोऽध्यासहेतुरन्यथा शङ्खे पीतताध्यासो न स्यात् पीतशङ्ख इति भ्रान्तेः प्रसिद्धत्वात्, गुडे कटुताध्यासो न स्यात् शुक्लपीतयोर्मधुरकटुतयोश्च विरुद्धतया साद्दश्याभावात् । अतोऽधिष्ठाने मिथ्यावस्तुनस्साद्दश्यदोषो नाध्यासहेतुः, एवं प्रमातुर्लोभादिदोषोऽपि नाऽध्यासहेतुर्विरक्तचित्तस्य लोभाभावेऽपि शुक्तौ रजताध्यासदर्शनात् तथा मन्त्रविदां सर्पाद्भयाभावेऽपि कदाचिद् रज्जौ सर्पाध्यासो भवत्येवातः प्रमातृदोषोऽपि नाध्यासहेतुः । तथा प्रमाणगतदोषोऽपि नाध्यासहेतू रूपशून्येऽपि नभसि नीलत्वाद्यध्यासस्य सार्वजनीनत्वात्, सर्वेषां तथाषि

Prof. Amodavardhana Kanchi Kamakoti Dharmashastra Pratishthana, Dharmashastra Mandir, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दोषोऽस्तीति कथनस्यायुक्तत्वात् 'अप्रत्यक्षे ह्याकाशे बालास्तलमलिनता-मध्यस्यन्ति'–इति भाष्यवचनाच्च। आकाशे कटाहवितानादिभ्रमे नीलभ्रमे च केवलं प्रमाणगतदोष एव नास्तीति न प्रमातृदोषोऽपि नास्ति सादृश्य-मपि नास्ति। सर्वेषां दोषाणामभावेऽपि यथा आकाशे नीलभ्रमो वितान-भ्रमः कटाह इति च भ्रमो जायते तथा आत्मन्यपि सर्वदोषाभावेऽ-ध्यासो भवत्येव।

यच्चोक्तमात्मनः प्रकाशरूपत्वात्तत्राज्ञानं न सम्भवति तत्र आत्म-स्वरूपप्रकाशस्याज्ञानाऽविरोधित्वात्। यदि तथा स्यात्तदा सुषुप्तौ प्रका-शात्मक आत्मनि तदज्ञानं न भायात्, स्वप्नोत्थितस्य सुखमहम-स्वाप्सं न किंचिदवेदिषमिति ज्ञानं स्मरणात्मकं जायते अविच्छिन्न-प्रवाहात्मकं प्रत्यक्षं वाऽनुवर्त्तते तज्ज्ञानं सुखगोचरमज्ञानगोचरं च भवति। अज्ञातस्य स्मरणाभावाज्ज्ञातस्यैव स्मरणसम्भवात्। यतः सुषुप्तौ सुखस्याऽज्ञानस्य च ज्ञानं जातं तज्ज्ञानं च नेन्द्रियजन्यं तत्रे-न्द्रियादीनामन्तःकरणस्य चाभावाद् अतः सुषुप्तावात्मस्वरूपमेव ज्ञानं प्रकाशते इति। एवं सुषुप्तावात्मा प्रकाशस्वरूप एव तत्र स्वरूपसुखम-ज्ञानञ्चोभयं प्रतीयते। यद्यात्मस्वरूपप्रकाशोऽज्ञानविरोधि स्यात्तदा सुषुप्तौ तत्राऽज्ञानं न प्रतीयेत, अत आत्मनः प्रकाशात्मकत्वेऽप्यज्ञानाऽ-विरोधित्वादज्ञानसाधकत्वादज्ञानाधिष्ठानत्वाच्च तत्राऽज्ञानं संभवत्येव। अत एव वेदान्तग्रन्थेषु निरूपितं यत् सामान्यचैतन्यं नाज्ञानविरोधि किन्तु वृत्त्यारूढं विशेषचैतन्यमेव तथा। यथा काष्टस्थितः सामान्योऽग्निर्नान्ध-कारविरोधी किन्तु मथनेन जनितो वर्तिकारूढो वाऽग्निरन्धकारं नाशयति; अपि च यथा गवां सर्पिः शरीरस्थं न पुष्टिकार्याय प्रभवति किन्तु तदेवाविर्भूतं भोक्तृशरीरपुष्टये कल्पते, तथा सामान्यं गूढञ्च

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri

व्यापकचैतन्यं नाऽज्ञानविरोधि किन्तु वेदान्तविचारादहं ब्रह्मास्मीति-वृत्त्युपारूढं चैतन्यमेवाज्ञानं निवर्त्तयति । अहं ब्रह्मास्मीति वृत्त्यवच्छिन्नं चैतन्यं चैतन्यसहिता वा वृत्तिरज्ञाननिवर्त्तिकेत्यवच्छेदवादे । तादृशवृत्ति-प्रतिबिम्बितं चैतन्यमज्ञाननाशकं चैतन्यप्रतिबिम्बिता वृत्तिर्वाऽज्ञानना-शिकेति प्रतिबिम्बवादे । वृत्तियुक्तश्चिदाभासोऽज्ञाननिवर्तको वाऽऽभा-सयुक्ता वृत्तिरज्ञाननिवर्त्तिकेत्याभासवादे । सर्वथा चैतन्याश्रितमज्ञानं वर्तते, तेनाऽज्ञानेनावृते आत्मनि बन्धाध्यासो भवत्येव ।

यच्चोक्तं सामान्येन ज्ञाते विशेषात्मनाऽज्ञाते वस्तुन्यध्यासो भवत्यात्मनि सामान्यविशेषता नास्तीति कथं तत्राध्यास इति तदपि न, अहमस्मीति सर्वस्य ज्ञातत्वाद् अहं नास्मीति कस्याऽप्यप्रतीतेश्च सत्त्वरूपेण सर्वैरात्मनो ज्ञातत्वात्तेन रूपेणात्मनि ज्ञातत्वमस्ति । चेतन आनन्दो व्यापको नित्यशुद्धो नित्यमुक्त इत्येवं सर्वस्य प्रतीतिर्न भव-त्यतश्चेतनानन्दव्यापकनित्यशुद्धनित्यमुक्त इत्येवंरूपेणात्माऽज्ञातोऽस्ति । सर्वस्य प्रतीयमानं यदात्मनस्सत्त्वरूपं तत्सामान्यरूपं केवलं ज्ञानिनो भाति यच्चैतन्यानन्दादिकं तद्विशेषरूपम् । अधिककालेऽधिकदेशे यद्व-र्तते तत्सामान्यं, न्यूनकाले न्यूनदेशे यद्वर्तते तद्विशेषरूपमित्युच्यते । यद्यप्यात्मनः स्वरूपभूतमेव चिदानन्दादिकमतस्सत्त्वमिव चैतन्या-दिकमपि व्यापकमेवेति सत्त्वापेक्षया चैतन्यानन्दादिर्न्यूनदेशवृत्तित्वं तदपेक्षया सत्त्वस्याधिकदेशवृत्तित्वमिति कथमपि न संभवत्यतस्सत्त्व-रूपं सामान्यांशश्चैतन्यानन्दादिर्विशेषांश इत्यपि कथनं न संभवति तथापि सत्त्वप्रतीतिः सर्वस्य अविद्याकालेऽपि भवति चेतनानंन्दादि-स्वरूप आत्मेति सर्वस्य प्रतीतिरविद्याकाले न भवति, केवलं ज्ञानिन

Prof. Amoda Vardhana Kathmandu Nyayala Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization By eGangotri

एव भवति । अविद्याकाले(१) चेतनताऽऽनदता मुक्तता शुद्धताऽप्यस्ति परञ्च प्रतीत्यभावान्नास्ति—समेत्यभिप्रायेण चैतन्यानन्दादेर्न्यूनकालवृत्तित्वं सत्त्वस्याधिकालवृत्तित्वमिति चोच्यते । एवं सत्त्वांशस्य चैतन्यानन्दाद्यंशस्य च सामान्यविशेषता वस्तुतो नास्ति तथापि यथा-तयोरधिककालेऽल्पकाले च प्रतीतेः सामान्यविशेषतेव वर्तते अत एवात्मनः सत्त्वरूपः सामान्यांशश्चैतन्यानन्दादिको विशेषांश इति नाऽसङ्गतम् । आत्मा निर्विशेष इति सिद्धान्तोऽपि न विहन्यते, यत-आत्मनि सामान्यविशेषता न वस्तुतोऽभ्युपगम्यते किंन्त्वविद्यया सामान्यविशेषतावत्प्रतीयतेऽतः सामान्यविशेषतोच्यते । एवं रीत्या सत्त्वात्मना ज्ञाते चिदानन्दनित्यशुद्धनित्यमुक्तस्वरूप इत्येवंरूपेणाज्ञाते आत्मनि बन्धाध्यासस्संभवत्येव । अध्यासात्मकस्य बन्धस्य ज्ञानेन निवृत्तिरपि संभवति—बन्धो मिथ्या ज्ञाननिवर्त्यत्वाद्रज्जुसर्पवदित्यनुमानात् । बन्धस्याज्ञानकार्यत्वाज्ज्ञानेनैव मोक्षो यथा स्वाप्नपदार्थानां जागरणमन्तरेण न निवृत्तिरेवं बन्धस्यापि मिथ्याप्रतीतत्वाज्ज्ञानं विना न निवृत्तिः 'ज्ञात्वा देवं मुच्यते सर्वपाशैः', 'शोकं तरति आत्मवित्,' 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' इति श्रुतिस्मृतिप्रमाणात् ।

ब्रह्मविषयकाऽज्ञानाश्रयो जीव इति भामतीकृन्मतेऽपि सर्गादौ प्रथमाऽध्यासकाले अज्ञानाश्रयजीवस्य बुद्धितादात्म्यापन्नचैतन्यरूपस्य अभावेऽपि नाऽव्यवस्था, यतः प्रथमाध्यासाश्रयो विभ्रमप्रवाहस्याऽनादित्वेन पूर्वपूर्वविभ्रमसंस्कारसचिवाऽविद्योपहितः सम्भवत्येव । तदु-

(१) निर्धर्मके ब्रह्मणि आनन्दतादिधर्मणां कथने व्याघातोऽद्वैतहानिर्वेति न शङ्कनीयम् । त्रैकालिकदुःखात्यन्ताभावाद्यात्मकत्वादेव आनन्दतादिधर्मणामभावस्य च अधिकरणात्पृथक्सत्ताविरहाच्च सर्वं निरवद्यम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्तम् परिमलकृता 'प्रलये संस्काराश्रयस्य तावन्नासंभवः, अविद्यायाः सत्त्वात्, सर्वोऽपि हि प्रपञ्चस्तदानीमविद्याचित्रभित्तौ संस्कारमात्रशेषं स्थित्वा पुनरुद्भवतीत्यङ्गीक्रियते। अत एव बीजाङ्कुरप्रवाहानादिताया अपि प्रलये तत्संस्कारसत्त्वेनैव निर्वाहः। नाऽप्यननुगमः। सर्वेष्वप्यध्यासेषु पूर्वपूर्वभ्रमसंस्कारसचिवाविद्योपधानमेव प्रयोजकं न तु बुद्धितादात्म्यापत्तिरपीत्यभ्युपगमे दोषाभावात्।'

समस्तविश्वस्य चेतनाचेतनविभागापन्नस्याऽध्यासात्मकत्वे सर्वेषामद्वैतिनां नये समानेऽपि वादत्रयानुसारेण विभिन्नरूपताऽभ्युपेयते। तथा च—वस्तुतो बिम्बभूताद् ब्रह्मणः सर्वदाऽभिन्नमपि भिन्नतया प्रतिभासमानमविद्यातत्कार्यप्रतिबिम्बात्मकं जगदिति प्रतिबिम्बवादिनः; ब्रह्मविषयकाऽविद्याश्रयजीवकल्पितं घटाकाशादिवत्परिछिन्नं वस्तुतोऽभिन्नमप्यौपाधिकभेदसम्वलितमविद्यातत्कार्याऽन्यतरावछिन्नचैतन्यात्मकं जगदित्यवच्छेदवादिनः; अविद्यातत्कार्याऽन्यतरगताभासाऽविविक्तस्वाभासप्रतियोगिचिदात्मकं तादृशाभासाऽविविक्तचिदाभासरूपं वा जगत्, आभासश्च बिम्बभूतचिद्भिन्नाऽभिन्नतदुभयाऽन्यतमात्मकत्वेन निर्वचनानर्हं नूतनमेव प्रतिभानमित्याभासवादिनः। एवञ्च संसारस्वरूपनिर्वचनप्रकारभेदेऽपि संसारो बन्धस्वरूपो जीवस्वरूपावरकश्चेत्यत्र मतैक्यमिति तत्परिहाणं कथम्भवेदिति विचारणीयम्। तत्र ज्ञानेनैव मोक्षः कर्मणा तु मोक्षो न भवति अविरोधितया—**'कर्म नाऽविद्यां विनिवर्तते' 'विद्याऽविद्यां निहन्त्येव, तेजस्तिमिरसंघवद्'** इति भाष्यकारवचनात्। **'कुर्वन्नेव'** इत्यादिश्रुतिवाक्यमविरक्तविषयं **'कर्मणैव हि संसिद्धिः'** इत्यत्र स्मृतिवाक्ये संसिद्धिशब्दो न मोक्षपरो ज्ञानयोग्यतापरश्चित्तशुद्धिपरो ज्ञानपरो वा। कर्मणा चित्तशुद्धि-

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जायते तया विवेकादिसाधनचतुष्टयप्राप्तिर्भवति । अनन्तरं श्रोत्रिय-ब्रह्मनिष्ठाचार्यद्वारा वेदान्तश्रवणादिनाऽहं ब्रह्मास्मीत्यपरोक्षज्ञानं जायते ततो मोक्षो भवति । सञ्चितकर्मणां नाश आगामिकर्मणामसम्बन्धश्च भवति । विदुषो जीवत एव बन्धभ्रमाभावो जीवन्मुक्तिः **'यथेषीकातूलमग्नौ प्रोतं प्रदूयेत एवमस्य विदुषः पापं कर्म प्रदूयेत 'ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन'** इत्यादिवाक्येभ्यः । तथा तत्त्वज्ञानिनो भोगेन प्रारब्धक्षये वर्तमानशरीरपातो विदेहमुक्तिः **'न स पुनरावर्त्तते' 'न तस्य प्राणा उत्क्रामन्त्यत्रैव संविलीयन्ते', 'यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम'** इत्यादि श्रुतिस्मृतिवाक्येभ्यः **'भोगेन त्वितरे क्षपयित्वा संपद्यते'** इति सूत्राच्च । जीवन्मुक्तस्य प्रारब्धकर्मणा व्यवहारेऽपि लेपो न भवति यथा पुष्करपलाशमापो न श्लिष्यन्ते एवं ब्रह्मविदि पापं कर्म न श्लिष्यते—**'तद्ब्रह्माहमिति ज्ञात्वा, सर्वबन्धैः प्रमुच्यते'** इति श्रुतेः ।

ननु शब्दानां परोक्षज्ञानजनकत्वस्य सुव्यवस्थितत्वात्कथं ब्रह्मणोऽपरोक्षसाक्षात्कारपर्यवसायित्वं तेषामिति चेन्न **'दशमस्त्वमसि'**—इतिवच्छब्दस्याऽप्यपरोक्षज्ञानजनकत्वं निर्विवादमेव । ब्रह्मात्मनोरव्यवहितत्वात् **'ब्रह्मविद् ब्रह्मैव भवति'** इति श्रुतेः । ननु **'तत्त्वमसि'**—इतिवाक्यादेवाऽपरोक्षज्ञाने सति श्रवणादेर्वैयर्थ्यं तन्न असम्भावनादेर्निवर्त्तकतया तेषां सर्वथा साफल्यात् । श्रवणेन वेदान्तवाक्यं ब्रह्मपरमन्यपरं वेति प्रमाणगताऽसम्भावना निवर्तते । उपक्रमादिषड्विधतात्पर्यलिङ्गैर्वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणं श्रवणम् । मननेन जीवब्रह्मणोरभेदः सत्यो भेदो वा सत्य इति प्रमेयगताऽसंभावना निवर्त्तते । श्रवेन सम्परिज्ञातस्यार्थस्य युक्तिभिश्चिन्तनं मननम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitized by eGangotri

निदिध्यासनेन देहादिप्रपञ्चस्सत्यो जीवब्रह्मणो भेदः सत्य इति विपरीतभावना निवर्त्तते। प्रतिबन्धकानां संशयादीनां पुरुषापराधानां निवृत्त्या ब्रह्मणोऽपरोक्षज्ञानं जायते। उक्तञ्च :—

पुरुषापराधमलिना धिषणा निरवद्यचक्षुरुदयापि यथा।
न फलाय भर्छविषया भवति श्रुतिसंभवापि तु तथात्मनि धीः ॥१॥
पुरुषापराधविरामे तु पुनः प्रतिबन्धकव्युदसनात्सफला।
मणिमन्त्रयोरपगमे तु यथा सति पावकाद्भवति धूमलता ॥ २ ॥
पुरुषापराधविनिवृत्तिफलः सकलो विचार इति वेदविदः।
अनपेक्षतामनुपरुध्य गिरः फलवद्भवेत्प्रकरणं तदतः ॥ ३ ॥
पुरुषापराधशतसंकुला विनिवर्तते प्रकरणेन गिरः।
स्वयमेव वेदशिरसो वचनादथ बुद्धिरुद्भवति मुक्तिफला ॥ ४ ॥

मुक्तिर्द्विधा विदेहमुक्तिर्जीवन्मुक्तिश्चेति। अहं ब्रह्माऽस्मीति तत्त्वज्ञानिनो भोगेन प्रारब्धक्षये वर्तमानदेहपाते विदेहमुक्तिः **'भूयश्चान्ते विश्वमायानिवृत्तिः'** इत्यादिवचनात्। केचित्तु भाविशरीरानारम्भो विदेहमुक्तिः सा च ज्ञानसमकाल एव सञ्चितकर्मणां नाशादागामिकर्मणामश्लेषाद्भोगेन प्रारब्धक्षयाद् देहान्तरारम्भकासंभवाद् भाविदेहानारम्भस्य ज्ञानसमकालता युज्यते उक्तञ्च :—

तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहं।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः ॥ १ ॥ इति।

उत्पन्नब्रह्मसाक्षात्कारस्य विदुषो निखिलकर्तृत्वादिबन्धप्रतिभासनिवृत्तिर्जीवन्मुक्तिः **'यदा सर्वे प्रमुच्यन्ते कामा ह्यस्य हृदि स्थिता— अथ मर्त्योऽमृतो भवति ह्यत्र ब्रह्म समश्नुते'** इति श्रुतेः, **'यस्य नाहंकृतो भावः'** इत्यादिस्मृतेश्च।

Prof. Amoolyardhana Kaudinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नन्वज्ञानकार्यतया शास्त्राचार्यादीनां मिथ्यात्वात् ततः प्रपञ्चनिवृत्तिर्न स्यादिति चेन्न स्वप्नदृष्टव्याघ्रादेर्मिथ्यात्वेऽपि स्वप्ननिवर्तकत्ववन्मिथ्याभूतानामपि शास्त्राचार्याणां कण्टकेनैव कण्टकमिति न्यायेन प्रपञ्चनिवर्तकत्वोपपत्तेर्मिथ्यावस्तुनाशे सत्यसाधनोपयोगाभावाद्यज्ञानुरूपो बलिरिति न्यायाच्च । नन्वहं ब्रह्मास्मीत्यादिवाक्यजन्यज्ञानस्याप्यज्ञानकार्यत्वात्कार्यकारणयोर्विरोधाभावात्कथं ज्ञानादज्ञाननिवृत्तिरिति चेन्न कार्यकारणयोरविरोध इत्ययं सामान्यनियमः समानविषयकज्ञानाज्ञानयोर्विरोध इत्ययञ्च विशेषनियमः, विशेषनियमेन सामान्यनियमबाधेर्निर्विवादः । यथा पटाग्निसंयोगस्याग्निसहितः पट उपादानं तत्र संयोगस्योभयजन्यत्वात्पटोप्युपादानं तेन पटाग्निसंयोगेन पटो नश्यति; एवमग्नेर्दारुजन्यत्वेऽपि दारुनाशकत्वं प्रसिद्धं तथा ज्ञानस्याज्ञानजन्यत्वेऽप्यज्ञाननाशकत्वं भवत्येव । ननु सकलाज्ञानस्य तत्त्वज्ञाननाश्यत्वे जीवन्मुक्तविदुषो ब्रह्मज्ञानकाल एव देहाभावप्रसङ्गः उपादाननाशे कार्यस्थितेरसंभवात् इति चेन्न घटे जातेऽपि कुलालचक्रवेगवत् प्रक्षिप्तधनुषो बाणवेगच्च ज्ञाने जातेऽपि प्रारब्धकर्मणा तन्निश्शेषक्षयं यावत्सुतरां शरीरावस्थानसंभवात्–**'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य'** इतिश्रुतेः, **'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्'** इति श्रुतेश्च । सर्वथाहं ब्रह्मास्मीति ज्ञानेन सविलासानर्थात्मकस्याज्ञानस्य निवृत्तिः परमानन्दावाप्तिश्च भवति। नित्यनिरतिशयविशुद्धानन्दाधिगम एव मोक्षः–**'आत्मानं चेद्विजानीयादयमस्मीति पुरुषः । किमिच्छन् कस्य कामाय शरीरमनुसंज्वरद्'** इतिश्रुतेः **'यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमान् लोकान् नैव हन्ति न बध्यते' । 'कृतं कृत्यं प्रापणीयं प्राप्तम्'**–इत्यादिविद्यारण्यवचनात् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सद्भावभावमापन्नस्ततोऽसौ परमात्मना ।
भवत्यभेदो भेदश्च तस्याज्ञानकृतो भवेद् ॥ १ ॥

इति वचनाच्च **'एतद्बुध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत ।'** इत्यादिभगवद्वचनाच्च **'न कर्मणा लिप्यते न प्रजया धनेन'** इति श्रुतेश्च ।

ननु तत्त्वज्ञानोत्तरकाले विदुषो देहस्थितौ प्रक्षिप्तधनुषो बाणवेगवदित्युदाहरणं न सम्भवति धनुषो निमित्तत्वाद्बाणस्य निमित्तनाशे कार्यस्य संभवादुपादाननाशे तु कार्यस्थितेरसम्भवादविद्योपादानकस्य विदुषो देहस्याऽविद्यानाशे कथं स्थितिरिति चेन्न **'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये'**—इति श्रुत्यनुसारेण विद्वदनुभवानुसारेण चाविद्योपादानकस्यापि विदुषो देहस्याविद्याबाधोत्तरकालेऽपि लेशतः स्थितिसंभवात् । तत्त्वज्ञाने सत्यप्यविद्यालेशोऽनुवर्त्तत इति वेदान्तग्रन्थे लेखात् । तत्र मतभेदेनाविद्यालेशस्वरूपं त्रिविधं निरूपितम्—यथा प्रक्षालितलशुनभाण्डे गन्धस्तिष्ठति तथाऽविद्यासंस्कारोऽविद्यालेश इत्युच्यते । अथवाऽग्निदग्धपटवत्स्वकार्येऽसमर्था ज्ञानबाधिताऽविद्यैवाविद्यालेश इत्युच्यते । अथवा आवरणशक्तिर्विक्षेपशक्तिश्चेत्यंशद्वयवत्यविद्या, तत्त्वज्ञानादावरणशक्तिविशिष्टाविद्यांशस्य नाशः प्रारब्धकर्मप्रतिबन्धे सति विक्षेपशक्तिविशिष्टाऽविद्यांशो न नश्यति । तत्त्वज्ञानोत्तरकालेऽपि देहादिविक्षेपोपादानभूतोऽविद्यांशस्तिष्ठति ततस्स्वरूपावरणं न भवति स एवाऽविद्यांशो विद्यालेश इत्युच्यते । **सर्वज्ञात्ममुनिस्तु**—तत्त्वज्ञानोत्तरकाले शरीरादिप्रतिभासो न भवति **'जक्षन् क्रीडन् रममाणस्त्रीभिर्यानैः'** **'तस्य तावदेव चिरम्'**—इत्यादिमुक्तिप्रतिपादकश्रुतिवचनानां स्वार्थे तात्पर्याभावात् श्रवणविधेरर्थवादत्वाच्च, यस्मिन् श्रवणे सति जीवन्नेव सन्

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. eGangotri

पुरुषो मुक्तो भवतीत्येतादृशमात्मश्रवणम्, एवं रीत्या जीवन्मुक्तिप्रतिपादकवचनानामात्मश्रवणस्तुतौ तात्पर्यान्न विदुषो देहादिप्रतिभास इति वदति। एवं रीत्या तन्मते तत्त्वज्ञानादव्यवहितोत्तरकाल एव विदेहमोक्षो भवति तत्त्वज्ञानोत्तरकालेऽविद्यालेशोऽपि न तिष्ठति । परञ्चेदं मतं विद्वदनुभवविरुद्धम् । ननु येन तत्त्वज्ञानेन सकार्याज्ञाननिवृत्तिस्तज्ज्ञानस्य परिशिष्टत्वात्तेनाद्वैतहानिरिति चेन्न तस्यापि स्वयमेव निवृत्तेरुक्तत्वात्, विस्तरेणाऽग्रे वक्ष्यमाणत्वात् ।

अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम् ।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवद् ॥ १ ॥ इति वचनात् ।

यथा तृणकूटे प्रक्षिप्तो वह्निस्तृणकूटं भस्मसात्कृत्वा स्वयमपि तृणकूटेन सहैव भस्मीभवति तथा सकार्याज्ञाननिवृत्तौ सत्यां तत्त्वज्ञानमपि तया सकार्याज्ञाननिवृत्त्या सहैव निवर्त्तते.न तन्निवृतौ साधनान्तरमपेक्षते ।

पद्मपादाचार्यस्तु प्रतिपादयन्ति यज् ज्ञानस्याज्ञानमात्रविरोधित्वात्तत्कार्याविरोधित्वात्तत्त्वज्ञानात्केवलमेवाऽज्ञानं निवर्तते तन्निवृत्तावुपादाननिवृत्तौ कार्यनिवृत्तिरिति न्यायादज्ञानकार्यनिवृत्तिर्भवति परं च देहादिकार्यनिवृत्तौ प्रारब्धकर्मणां प्रतिबन्धकत्वादुक्तरीत्याऽविद्यालेशो यावत्तिष्ठति तावत्कालं जीवन्मुक्तस्य देहादिप्रतिभासोऽपि प्रचलत्येव । प्रारब्धात्मकप्रतिबन्धाभावे सति देहादेस्तत्त्वज्ञानस्य च निवृत्तिर्भवति । अस्मिन्मते प्रारब्धाभावसहिताऽविद्यानिवृत्तिरेव तत्त्वज्ञाननिवृत्तिहेतुरिति । तत्त्वज्ञानेनाविद्या निवर्त्तते तस्य तत्त्वज्ञानस्य साधनद्वयमिति उत्तमाधिकारिणे तु श्रवणादिकं मध्यमाधिकारिणे निर्गुणब्रह्मणोऽहङ्ग्रहोपासनमेव तत्त्वज्ञानसाधकम् । ध्येयस्य स्वस्मादभेदचिन्तन-

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महङ्ग्रहध्यानमुपासनमिति सर्वस्याऽद्वैतशास्त्रस्य सिद्धान्तः परन्तु मतद्वयेऽपि तत्त्वज्ञानस्य करणात्मकं प्रमाणं प्रसङ्ख्यानमेवेति केचित् । वृत्तिप्रवाहः प्रसङ्ख्यानम् । यथा मध्यमाधिकारिणो निर्गुणब्रह्माकारवृत्तिप्रवाहात्मकं निरन्तरमुपासनं कर्त्तव्यं तदेव प्रसङ्ख्यानम् , तथोत्तमाधिकारिणोऽपि मननोत्तरकाले निदिध्यासनात्मकं प्रसङ्ख्यानमेव ब्रह्मसाक्षात्कारकरणम् । यद्यपि षड्विधप्रमाणेषु प्रसङ्ख्यानान्तर्भावाऽभावात्तस्य प्रमाकरणत्वं न सम्भवति तथापि सगुणब्रह्मध्यानस्य तत्साक्षात्कारकरणत्वं निर्गुणब्रह्मध्यानस्य तत्साक्षात्कारकरणत्वं, **'तं यथा यथोपासते तदेव भवति'** इति श्रुतौ, **'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्'** इति स्मृतौ च प्रसिद्धम् । तथाऽव्यवहितकामिनीप्रसङ्ख्यानस्य तत्साक्षात्कारकरणत्वं लोके प्रसिद्धमेव । अतो निदिध्यासनात्मकस्य प्रसङ्ख्यानस्यापि ब्रह्मसाक्षात्कारकरणत्वं संभवत्येव । यद्यपि प्रसङ्ख्यानजन्यस्य ब्रह्मज्ञानस्य प्रमाणजन्यत्वाभावेन प्रमात्वं न संभवति तथापि संवादिभ्रमवद्विषयाबाधात्प्रमात्वं संभवत्येव । निदिध्यासनात्मकस्य प्रसङ्ख्यानस्य शब्दप्रमाणमूलत्वेनापि ब्रह्मज्ञानस्य प्रमात्वं संभवत्येव ।

वाचस्पतिमते ब्रह्मज्ञाने मनः करणं प्रसङ्ख्यानं तु मनसस्सहकार्येव तस्य ज्ञानकरणत्वेनाऽप्रसिद्धेः । सगुणब्रह्मध्यानं निर्गुणब्रह्मध्यानं चापि तत्र साक्षात्कारे करणं न भवति किन्तु सहकारि भवति, करणं तु मन एव । तथाऽव्यवहितकामिनीध्यानमपि तत्साक्षात्कारे करणं नास्ति किन्तु कामिनीचिन्तनसहितं मन एव तत्साक्षात्कारे करणं भवतीत्येवंरीत्या मन एव ब्रह्मज्ञाने करणम् ।

अद्वैतग्रन्थानां मुख्यं मतं यद् वाक्यजन्यज्ञानान्तरं प्रसङ्ख्यानापेक्षा न भवति किन्तु तत्त्वमस्यादिमहावाक्यादेव ब्रह्मसाक्षात्कारो भवति ।

Prof. Anoda Vardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषु ज्ञानेषु सहकारिभूतं मनोऽतो निदिध्यासनजन्यैकाग्रतासहितं मनस्सहकार्येव, वेदान्तवाक्यात्मकश्शब्द एव ब्रह्मज्ञाने करणं न मनः, वृत्त्यात्मकं ज्ञानं प्रत्युपादानतयाऽन्तःकरणस्याश्रयत्वात् तत्कर्तृत्वमेव मनसो न करणत्वम् । ज्ञानान्तरेषु मनसः करणत्वाभ्युपगमेऽपि ब्रह्मज्ञान-करणत्वे तु सर्वथा विरुद्धत्वान्न संभवति । **'यन्मनसा न मनुते'** इत्यादिश्रुतौ ब्रह्मणो मानसज्ञानविषयतानिषेधात् **'तं त्वौपनिषदं पुरुषं पृच्छामि'**–इत्यादावुपनिषदात्मकस्य शब्दस्यैव तत्र करणता-भिधानाच्च । अतो ब्रह्मज्ञाने शब्द एव करणं न मनस्तत्र करणम् । ननु **'यन्मनसा न मनुते'** इति मनसो ब्रह्मज्ञानकरणतानिषेधो यथा श्रुत्या कृतस्तथैव **'यतो वाचो निवर्तन्ते नैव वाचा न मनसा'**–इत्यादिश्रुत्या वाचोऽपि ब्रह्मज्ञानकरणतानिषेधः कृत एवातो वाचोऽपि ब्रह्मज्ञानकरणत्वं श्रुतिविरुद्धमेवेति चेन्न शब्दस्य ब्रह्मज्ञानकरणत्वं नास्तीत्यत्र श्रुतेस्तात्पर्याभावात् । अन्यथा ब्रह्मण औपनिषदत्वकथन-मसङ्गतं स्यात्, उपनिषद्वेद्यत्वमौपनिषदत्वमिति प्रसिद्धेरतश्शब्दस्य लक्षणावृत्त्या ब्रह्मगोचरं ज्ञानं भवति शक्तिवृत्त्या ब्रह्मज्ञानं न भवतीत्यत्र श्रुतेस्तात्पर्यमतश्शक्तिवृत्त्या शब्दस्य ब्रह्मज्ञानकरणत्वनिषेधो लक्षणा-वृत्त्या शब्दस्य ब्रह्मज्ञानकरणत्वाद् ब्रह्मणोऽप्यौपनिषदत्वं संभवत्येव **'प्रमेयञ्चाऽप्रमेयञ्च'**–इत्यादिश्रुतेः । **सुरेश्वराचार्यास्तु** प्रसुप्तजागरण-वाक्यवत् शब्देऽचिन्त्यशक्तिमभ्युपगम्य तत्त्वमस्मादिवाक्यस्यैव **साक्षाद्** ब्रह्मसाक्षात्कारकरणत्वं साधयन्ति । ये ब्रह्मसाक्षात्कारो मानस इति मन्यन्ते तेषां मतेऽपि ब्रह्मणः परोक्षज्ञानं शब्दादेव भवतीति मत-मतो ब्रह्मज्ञाने शब्दस्य करणत्वं मतद्वयेष्यावश्यकमेव भवतीत्यतो ब्रह्मसाक्षात्कारे शब्द एव करणं न तु मनः करणम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्या ब्रह्मसाक्षात्कारे शब्दः करणम्। यद्यपि शब्दे परोक्षज्ञानोत्पादनसामर्थ्याभावाच्छब्दादपरोक्षज्ञानोत्पत्तिर्न सम्भवति तथापि शास्त्रोक्तश्रवणमननपूर्वकब्रह्मगोचरज्ञानसंस्कारविशिष्टैकाग्रचित्तसहिताच्छब्दाद्ब्रह्मणोऽपरोक्षज्ञानं भवत्येव। यथा प्रतिबिम्बवादे जलपात्रदर्पणादिसहकृतान्नेत्रात्सूर्यादेस्साक्षात्कारो भवति तत्र केवलनेत्रे सूर्यादिसाक्षात्कारसामर्थ्यं नास्ति, चञ्चलोपाधिसन्निधानेपि मलिनोपाधिसन्निधानेऽपि च सामर्थ्यं नास्ति, निश्चलनिर्मलोपाधिसहकृते नेत्रे एव सूर्यादिसाक्षात्कारसामर्थ्यं भवति, यथा वाऽवच्छेदवादे केवलमन्तःकरणं न ब्रह्मसाक्षात्कारकरणं किन्तु तदेव निर्विचिकित्सभावनापरिपाकसहितं तथा, तथैव शास्त्रसंस्कारविशिष्टनिर्मलनिश्चलचित्तात्मकदर्पणसहकृताच्छब्दादपि ब्रह्मणोऽपरोक्षज्ञानं संभवति। किञ्च यथा लौकिकेऽग्नौ हवनात्स्वर्गजनकमपूर्वं नोत्पद्यते। वैदिके संस्कारसहितेऽग्नौ हवनात्स्वर्गजनकमपूर्वमुत्पद्यते। हवनस्य स्वर्गसाधनता श्रुतावुक्ता द्वितीयक्षणविनाशिनस्तस्य कालान्तरभाविस्वर्गसाधनता न संभवत्यतस्स्वर्गसाधनतानुपपत्यात्मकार्थापत्तिप्रमाणाद्यथाऽपूर्वसिद्धिस्तथा ब्रह्मज्ञानादध्यासात्मकदुःखनिवृत्तिस्तरति शोकमात्मविदित्यादिश्रुत्युक्ता, कर्तृत्वाद्यऽध्यासोऽपरोक्षस्तन्निवृत्तिर्न परोक्षज्ञानात्संभवति किन्त्वऽपरोक्षज्ञानादेवापरोक्षाध्यासनिवृत्तिरतो ब्रह्मज्ञानस्यापरोक्षाध्यासनिवृत्त्यनुपपत्त्या प्रमाणान्तरागोचरब्रह्मणः शब्दादपरोक्षज्ञानं सिध्यति। यथा श्रुतार्थापत्त्याऽपूर्वसिद्धिस्तथा शब्दजन्यब्रह्माऽपरोक्षज्ञानमपि श्रुतार्थापत्त्यैव सिध्यति। यथा वाचस्पतिमते बाह्यवस्तुसाक्षात्कारेऽसमर्थं मनस्तथापि भावनासहितेन मनसा नष्टवनितासाक्षात्कारो भवति तथा केवलशब्दस्त्वऽपरोक्षज्ञानेऽसमर्थः परञ्च पूर्वोक्तमनःसहितशब्दाद ब्रह्मणोऽपरोक्षज्ञानं भवति। अन्यैस्त्वेवं

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitized by eGangotri

समाहितं यज्ज्ञाने विषये चोभयत्रापरोक्षत्वव्यवहारो भवति नेत्रादीन्द्रियेण घटे ज्ञाते घटस्य प्रत्यक्षज्ञानं घटश्च प्रत्यक्ष इति व्यवहारस्यानुभवसिद्धत्वात्। तत्र ज्ञानेऽपरोक्षत्वं न करणाधीनमिन्द्रियजन्यं ज्ञानमपरोक्षं अनुमानादिजन्यं ज्ञानं परोक्षमित्येवं नियमाभावात्, इन्द्रियजन्यज्ञानस्यापरोक्षत्वनिरासाच्चेत्येवं ज्ञानेऽपरोक्षत्वं परोक्षत्वं च न करणाधीनं किन्त्वपरोक्षार्थगोचरं ज्ञानमपरोक्षं परोक्षार्थगोचरञ्च परोक्षमित्येवंरीत्या ज्ञानेऽपरोक्षत्वं विषयायत्तमतोऽपरोक्षविषयगोचरं ज्ञानमपरोक्षमित्युच्यते। एवंरीत्या ज्ञानेऽपरोक्षत्वस्य विषयाधीनत्वादपरोक्षविषयकं ज्ञानमपरोक्षमेव, तच्चेन्द्रियजन्यं प्रमाणान्तरजन्यं भवेदित्यत्र नाभिनिवेशः, अत एव सुखादिज्ञानमीश्वरज्ञानं स्वप्नज्ञानं वेन्द्रियाजन्यमप्यपरोक्षमेव। अपि च ज्ञाने इन्द्रियजन्यत्वरूपमपरोक्षत्वं नास्ति किन्त्वपरोक्षार्थगोचरं ज्ञानं यत्तदपरोक्षमित्युच्यते। प्रमाणचैतन्यस्य विषयचैतन्याऽभिन्नत्वं ज्ञानगतापरोक्षत्वप्रयोजकम्, प्रमातृचैतन्याऽभिन्नत्वञ्च विषयगतापरोक्षत्वप्रयोजकम्, प्रमातृचैतन्याऽभिन्नत्वं प्रमातृसत्तातिरिक्तसत्ताशून्यत्वं विवक्षितम्, सुखादेरन्तःकरणधर्मस्य साक्षिण्यध्यस्ततयाऽधिष्ठानातिरिक्तसत्ताऽभावेन तस्य सुखादेः प्रमातृचैतन्येन सदाऽभिन्नत्वात्तेषु सुखादिषु नित्यापरोक्षत्वं तद्गोचरज्ञानेऽप्यपरोक्षत्वम्। यद्यपि बाह्यघटादेर्बाह्यघटादिचैतन्येऽध्यस्तत्वात्तेषां प्रमातृचैतन्येन सदाऽभेदो नास्ति तथापि वृत्तिद्वारा बाह्यचैतन्याभेदो यदा भवति तदा प्रमातृचैतन्यमेव घटादेरप्यधिष्ठानं भवत्यत इन्द्रियजन्यघटादिगोचरवृत्तिदशायामेव घटादावपरोक्षत्वं भवति तद्गोचरे ज्ञानेऽप्यपरोक्षत्वमुच्यते। अनुमित्यादिस्थले प्रमात्रभिन्नत्वाभावादन्यादेर्विषयस्य नाऽपरोक्षत्वं किन्तु परोक्षत्वमेव, धर्मादेः

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रमात्रभिन्नत्वेप्ययोग्यतयाऽपरोक्षत्वं न भवति । ब्रह्मचैतन्यस्य तु प्रमात्रभिन्नत्वात्तत्राऽपरोक्षत्वं भवत्येव । तस्माद् दशमस्त्वमसीतिवत्तत्त्वमसीति महावाक्यात्मकशब्दप्रमाणजन्यब्रह्मज्ञानमप्यपरोक्षमेव जायते । एवं रीत्या ब्रह्मणो नित्यापरोक्षत्वम् । अहं ब्रह्मास्मि इत्यनुभवाद्विदुषो जीवन्मुक्तिर्निरूपिता, **'अहं ब्रह्मास्मि यो वेद स सर्वं भवति, नाभूत्या ईशते देवास्तेषामात्मा भवेद्धि स'** इति श्रुतेः, **'आत्मानं चेद्विजानीयादयमस्मीति पुरुष'**–इत्याद्यनेकवचनाच्च । तस्मात्सुव्यवस्थितमिदं यद्वाक्येन ब्रह्मसाक्षात्कारस्य फलं सकार्याज्ञाननिवृत्तिः ।

ननु सा च निवृत्तिर्ब्रह्मसाक्षात्काराज्जायते चेदविद्याध्वंसस्य सत्त्वे तस्य पूर्वविचारितदिशा ध्वंसे कस्याऽपि ध्वंसस्य जागरूकत्वात्कथं सर्वद्वैतहानिरद्वैतपर्यवसानञ्चेति मैवं चरमवृत्तेः सर्वद्वैतविरोधित्वं न सर्वद्वैतनाशजनकत्त्वम् , तज्जन्यनाशानभ्युपगमात् , अन्यथोक्तनाशस्याऽपि नाश्यत्वे नाशान्तराणामपि स्वीकार्यत्वेनाऽनवस्थाप्रसङ्गात् , अनाश्यत्वे सत्यत्वापत्तेरद्वैतहानिश्च । नापि द्वैताधिकरणकालपूर्वत्वानधिकरणवृत्तित्वम् , तस्यास्तद्वत्त्वे नियामकाभावेन मानाभावात् । एवञ्च तत्त्वज्ञानस्य वैयर्थ्यापत्तिः । एतावत्कालमनुवृत्तं द्वैतं तत्त्वविज्ञानोत्तरं क्व गतमिति पर्यनुयोगश्च स्यात् । किन्त्वेवं सति कपालादिदेशावच्छेदेन दण्डादिकारणकूटवान् यः क्षणस्तदव्यवहितोत्तरक्षणस्य घटादिकार्यवत्वेऽपि नियामकाभावाद् दण्डादेर्घटादिहेतुत्वस्वीकारो व्यर्थः स्यात् । एतावत्कालमसतो घटादेः कथमुत्तरक्षणे सत्त्वमिति पर्यनुयोगश्च । अथ स न व्यर्थः, उत्तरक्षणे घटादिसत्त्वव्याप्यत्वस्य प्रामाणिकत्त्वात्तस्यैव तद्व्याप्यतारूपतन्नियामकतावत्वात् पूर्वमसतोऽपि घटादेरुत्तरक्षणे सत्त्वसंभव इति नोक्तपर्यनुयोग इति चेत् तर्हि या

Prof. Anodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri

यद्विषयकप्रमा सा स्वसमानविषयकाऽज्ञानतत्प्रयुक्ताधिकरणकालपूर्वत्वा-नधिकरणक्षणवृत्तिरितिव्याप्तेः शुक्त्यादिप्रमास्थले दृष्टत्वादात्मप्रमापि तथेति प्रमात्वस्यैवोक्तव्याप्यतारूपनियामकतावत्त्वात् तत्त्वज्ञानस्य सर्व-दृश्याश्रयकालपूर्वत्वाभावरूपसर्वदृश्योच्छेदधिया सर्वद्वैतविरोधित्वं सूप-पन्नम् ।

एवञ्चाऽयमेव संपिण्डितो विषयो यद् ब्रह्मसाक्षात्कारेण सविला-साज्ञाननाश इत्यत्र ज्ञापकत्वं तृतीयार्थः । ध्वंसो द्विविधो भवत्येकोऽ-निवृत्तनिवृत्तिरूपः, द्वितीयो निवृत्तनिवृत्तिरूपश्च । द्वितीयो वस्तुतो निवृत्तस्याऽपि भ्रमवशादनिवृत्तवत्प्रतिभासमानस्य अज्ञानाऽपनयनेन निवृत्तिरूपश्च । द्वितीय एव ग्रन्थकृतोऽभिप्रेतः स च न व्यावहारिकध्वंस-रूपः इति सर्वमसमञ्जसम् ।

तत्राऽयं विचारः समुदेति यश्चरमाया वृत्तेः को नाम विषयः ।

तत्र **वाचस्पतिमिश्रा** इत्थं मन्यन्ते स्वपरविरोधिविनश्यदवस्थवृत्ति-मात्रोपहितमेव चैतन्यं विषयः । न चैवं घटाद्याकारवृत्तितोऽविशेषः उभ-योरप्युपहितविषयत्वाविशेषादिति वाच्यं वृत्त्यतिरिक्तोपाध्यनुपहितविष-यत्वं विशेषः । एवं सति ब्रह्मणो न वृत्तिविषयत्वं स्वयंज्योतिष्ट्वविरो-धादित्यपि नोहनीयं निरुपाधिकस्य तथात्वेऽपि सोपाधिके तदभावात् । नन्वेवं चरमवृत्तेर्विशेषणत्वे तद्विशिष्टस्य न तत्त्वसाक्षात्कार-गोचरतोचिता, स्वस्य स्वविषयत्वमपि व्याहतमेव । किञ्च विशेषणभू-ताया वृत्तेरभास्यमानत्वे तद्विशिष्टत्वमपि नोपपन्नं विशेषणबुद्धेः विशिष्ट-बुद्धिहेतुत्वात् । वृत्तेरूपलक्षणत्वे च नैव वृत्त्युपाधिकता सम्भवति तस्य कादाचित्कत्वात् । अत्रोच्यते सत्तया वृत्त्युपरागस्योपयुक्तत्वेऽपि

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रतिभास्यतया तदभावेनाऽदोषात् । अयमाशयः कार्यान्वयिनो विशेषणत्वं कादाचित्कस्य चोपलक्षणत्वम् । अत्र च तदुभयं न सङ्गच्छते विशेषणत्वेन वृत्तेरप्रतिभासमानत्वादविद्यमानत्वाच्च किन्तु कार्यानन्वयिन्याः सत्त्वनियतायास्तादृशवृत्तेरुपाधित्वमेव ।

अपरे तु चैतन्यं न चक्षुरादिजन्यघटादिवृत्तिविषयः किन्तु घटादिरेव । यद्यपि घटादौ साक्षादज्ञानगोचरत्वं नोचितं तथापि जडावच्छिन्नचैतन्यप्रकाशावरणप्रयुक्तं जडेऽपि 'अस्ति' प्रकाशते, 'प्रियश्च' इत्येवमात्मकव्यवहारायोग्यत्वरूपमावरणं सम्भवत्येवेति साक्षात् परम्परया वा यदज्ञानावरणोयं तद्विषयकत्वमेव ज्ञानस्य तदज्ञाननिवर्त्तकत्वप्रयोजकमित्येवं निवेशान्न काऽपि क्षतिः । ततश्चेयान् विशेषोऽस्मिन् मते घटादिवृत्तितो ब्रह्मवृत्तेर्यन्मूलाऽज्ञानतत्कार्यातिरिक्ततद्विषयविषयकत्वरूपं मूलाऽज्ञाननिवर्त्तकत्वप्रयोजकं ब्रह्मवृत्तावेवाऽस्ति घटादिवृत्तिषु च मूलाज्ञानकार्यघटादिविषयत्वसत्त्वात्तद्विरहः ।

अन्येतु—चैतन्यस्वरूपमात्रं घटादिवृत्तिविषयो ब्रह्मवृत्तेस्तु जीवब्रह्माऽभेदगोचरता, जीवब्रह्मणोरैक्यलक्षणविषयं यज्ज्ञानं तदेव च मूलाज्ञाननिवर्त्तकम् । न चैतावता 'इदं रजतम्' इत्यादिभ्रमे अधिष्ठानसामान्यांशाऽपेक्षयाऽधिकशुक्त्यादिविशेषविषयकत्वस्य बाधकज्ञाने निवर्त्तकत्वप्रयोजकस्य दर्शनाद् भ्रमाधिकविषयकत्वमेव ज्ञानानां निवर्त्तकत्वप्रयोजकं कल्पनीयम् , किन्तु ज्ञानस्य सामग्रीविशेषप्रयोज्यत्वमेव भ्रमबाधकत्वप्रयोजकमिति द्वैतापत्तिभियाऽभेदज्ञानस्य घटादिवृत्तिविषयचैतन्यस्वरूपमात्रतो विषयत्वांशे विशेषत्वानाधायकत्वेऽपि सामग्र्यंशे विशेषत्वगर्भितत्वान्न घटादिवृत्तिब्रह्मवृत्त्योरविशेषः । तथा च महावाक्य-

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जन्यज्ञानस्य स्वविषयचैतन्येन सह यः स्वरूपसम्बन्धविशेषस्तत्त्वंपदवाच्यार्थधर्म्मिद्वयपरामर्शादिरूपसामग्रीविशेषाधीनत्वप्रयुक्तस्तत्सम्बन्धाऽवच्छिन्नचैतन्यगोचरत्वमेव ब्रह्मज्ञानस्याऽज्ञाननिवर्त्तकत्वप्रयोजकम्, तच्च घटादिवृत्तौ नास्ति सामग्रीविशेषप्रयुक्ताद्दशसम्बन्धविशेषविधुरचैतन्यमात्रगोचरत्वात्।

अद्वैतसिद्धिकारैस्त्वित्थमेवाभ्यधायि यत् 'अवच्छिनाऽनवच्छिन्नविषयतया' घटादिवृत्त्या चरमवृत्तेर्विशेषात्। एवञ्च चरमवृत्तौ अज्ञानतत्प्रयुक्ताकारस्य कस्याऽपि विषयतयाऽनर्पणाद्वृत्तेश्चाऽप्रतिभासमानत्वादनवच्छिन्नचैतन्यमेव विषयः। घटादिवृत्तिस्तु घटाद्यवच्छिन्नचिदाकारकज्ञानत्वान्न तथा। घटादिज्ञानं घटाद्याकाराकारितवृत्त्यवच्छिन्नचैतन्यरूपं तादृशवृत्तिप्रतिबिम्बितचैतन्यात्मकं वा तस्मादत्र सिद्धान्ते अज्ञानतत्प्रयुक्ताकारानवच्छिन्नप्रमात्वमेव मूलाज्ञाननिवर्त्तकत्वप्रयोजकं तच्च सर्वथा घटादिवृत्तिव्यावृत्तमेव।

इयमज्ञाननिवृत्तिः किमात्मरूपा तद्भिन्ना वा, नाद्य आत्मनो नित्यसिद्धत्वात्साध्यत्वानुपपत्तिः। नाऽपि द्वितीयस्तदतिरिक्तत्वे द्वैतापत्तिभियाऽसत्वप्रसक्तिपातात् सत्त्वाऽसत्त्वविकल्पाऽसहत्वात्। तत्रात्मरूपैवेति सुरेश्वराचार्यपूज्यपादास्तदुक्तम्—

निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः।
उपलक्षणनाशेऽपि स्यान्मुक्तिः पाचकादिवत्॥

तथा च चरमवृत्त्युपलक्षितात्मनोऽज्ञानहानिरूपत्वम्, तत्रोपलक्षणांशस्य साध्यत्वेन मुक्तेरपि साध्यत्वं युज्यते घटाकाशोत्पत्तिवत्।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

 CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection, Gangotri

उपलक्षणनिवृत्तावप्युपलक्षिताऽनुवृत्तेः पाचकादौ दर्शनान्मुक्तिसत्त्वे न काऽपि बाधा ।

अपि च साध्यत्वमपि द्विविधमेकं सादिपदार्थमात्रासाधारणं जन्यत्वरूपमपरं साद्यनादिसाधारणम् 'यस्मिन् सत्यग्रिमक्षणे यस्य सत्त्वम् यद्व्यतिरेके चाऽभावः, तत् तत्साध्यमित्यत्मकम् । दुःखप्रागभावस्याऽनादेरपि प्रायश्चित्तसाध्यत्ववत् , आत्मरूपाया अप्यज्ञाननिवृत्तेः ।ज्ञानेनेदृशसाध्यत्वं सूपपादं, ज्ञाने सत्यग्रिमक्षणे आत्मरूपाऽविद्यानिवृत्तिसत्त्वात्तदभावे चाऽज्ञानाऽपायाऽभावरूपाऽविद्यानुवृत्तिदर्शनात् ।

अविद्यानिवृत्तेरात्मान्यत्वपक्षेऽपि समाधानद्वयम् । तत्र **आनन्दबोधाचार्या** इत्थं सङ्गिरन्ते—अविद्यानिवृत्तिर्न सती, अद्वैतहानेर्नाप्यसती, ज्ञानसाध्यत्वानुपपत्तेः; नाऽपि सदसद्रूपाविरोधात ; नाऽप्यनिर्वचनीया घटादिवदज्ञानोपादानकत्वापत्तेः, मुक्तावापि तदुपादानाऽज्ञानानुवृत्त्यापत्तेर्ज्ञानाऽनिवर्त्यत्वापत्तेश्च । किन्तु वर्णितप्रकारचतुष्टयोत्तीर्णा पञ्चमप्रकारा । अद्भुतत्वमविद्यायाः भूषणं न तु दूषणम् । अन्ये तु अविद्यावत् तन्निवृत्तिमप्यनिर्वाच्यामेव मन्यन्ते अस्मिन् मते यथोत्पत्तिः कार्यजातस्याद्यक्षणैकसंसर्गी कश्चन भावरूपो विकारस्तथा निवृत्तिपदवाच्यनाशोऽपि चरमक्षणमात्रसंसर्गी कश्चन भावविकार एव न तु नैयायिकाऽभ्युपगतनित्यपदार्थो ध्वन्साऽभिधः, अन्यथा निवृत्तेरनुवृत्तौ चिरविनष्टेऽपि घटे 'इदानीं' निवर्त्तते नश्यति ध्वंसते'—इत्येव व्यवहारः समुचितो न तु 'निवृत्तो घटः' इति। तथा चैतादृशनिवृत्त्यभ्युपगमे न कोऽपि पूर्वोक्तदोषावसरः ।

Prof. Amodavardhana Kendriya Sanskrit Vidyapeetha Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मानन्दपूज्यपादास्तु :—'ब्रह्मविद्याया अस्तमयो नाम न खलु व्यावहारिकध्वंसरूपो विद्याजन्योऽस्मत्सिद्धान्ते स्वीक्रियते'। अयमाशयो यत्तत्त्वज्ञानं नाऽविद्याध्वंसकारणमपि तु तज्ज्ञापकमेव। तत्रापि नाऽविद्याध्वंसस्य किन्तु अविद्याश्रयकालपूर्वत्वाभावस्य। प्रयोगश्च—आत्मा स्वाश्रयकालपूर्ववर्त्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकाऽविद्याभाववान् तत्त्वज्ञानवत्त्वात्। तथैव दृश्यसामान्यनिवृत्तिरपि स्वाश्रयकालपूर्ववर्त्तित्वसम्बन्धावच्छिन्नदृश्यत्वावच्छिन्नप्रतियोगिताकाऽभावरूपैव। तदुक्तं स्वरूपप्रकाशैः—'निवृत्तिश्चोच्छेद एव। स च दृश्याधिकरणे क्षणे दृश्याऽधिकरणक्षणपूर्वत्वं नास्ति' इति। न चाऽत्र ज्ञाप्यज्ञापकभावे 'कार्यकारणभावाद् वा स्वभावाद् नियामकात्' इत्यनुरोधेन कतर इति शङ्कनीयम्। इदमत्र वक्तुं शक्यते यद् व्यभिचारशङ्काशङ्कसमुन्मूलकाऽनुकूलतर्कलाभायैव ज्ञाप्यज्ञापकभावस्योपर्युक्तदिशा सङ्कोचोऽत्र तु प्रमाणराजश्रुतिवाक्यैकशरणानां व्यभिचारशङ्काया एवाऽनवसरपराहतत्वान्न तादृशसङ्कोचसमादरः।

नाप्यद्वैतभङ्गशङ्कोद्भावनीया, निवृत्तेः शुद्धब्रह्माऽत्यन्ताऽभिन्नस्वरूपत्वात्। कथं तर्हि दृश्यसामान्यभावो व्यावहारिक इति चेदुच्यते दृश्यसामान्याभावो (व्यवहारिकप्रपञ्चरूपः) व्यवहारिकप्रतियोगिनिरूपितत्वविशिष्टरूपेण व्यावहारिकः केवलचिद्रूपेण तात्त्विकोऽपि भवितुमर्हति निरूपकरूपसमानसत्ताकरूपत्वस्य निरूप्ये नियमात् तस्मान्न खलु अविद्यापहारो दृश्यसामान्याभावो वा सम्पादनीयो येन कारणाऽपेक्षा स्यात् किन्तु नित्यसिद्ध एव केवलमज्ञातत्वादसिद्धकल्पतया प्रतीयमानो ज्ञापकमात्रमेवाऽपेक्षते इति हृदयम्। अत्र पूर्ववर्णित-

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.eGangotri

दिशा निवृत्तनिवृत्तिरूपमेव जिहासितमभिप्रेतम् तच्च नाऽज्ञानापनयन-मृते । तदुक्तम् :—

यथा कश्चित्स्वकण्ठस्थं मुक्ताहारं प्रमादतः ।
अविज्ञाय हृतं चौरैर्मन्यते मूढभावतः ॥ १ ॥
प्रबोधितोऽपि स पुनः कण्ठेऽस्तीति हि केनचित् ।
स्वात्मानमनुदाहृत्य यावत्कण्ठं न पश्यति ॥ २ ॥
तावन्नाप्नोति कण्ठस्थं हारं सूक्ष्मविमर्शयपि ।
एवं मुनिसुतात्मानं स्वस्वभावं निशम्य च ॥ ३ ॥
भूयोऽतिनिपुणोऽप्यन्तरात्मानमनुदाहरेत् ।
यावत्तावद्वहिः कुत्र कथं तद्विदितं भवेत् ॥ ४ ॥

एवञ्चाऽविद्यातत्प्रत्युपस्थापितपदार्थसार्थस्य ध्वंसादिपर्यवसानगवेषणा गगनरोमन्थायितमेव । तस्मादद्वैतमेवाऽवशिष्यते इत्यनवद्यम् ।

इति शम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विवरणादिप्रस्थानविमर्श-शुद्धिपत्रम्

		अशुद्धम्	शुद्धम्
प्राक्०	प०		
,,	४	शाङ्करोऽद्वैतवादिषु	शाङ्कराऽद्वैतवादिषु
मूलग्रन्थस्य			
पृ०	प०		
२	३	वन्धो	बन्धो
,,	,,	भवति ॥ तत्त्वज्ञानदीपेन	भवति, तत्त्वज्ञानदीपेन
,,	२२	गुडाकंश	गुडाकेश
३	५	भिधानात्	भिधानम्
४	४	सर्पस्थानावन्नं	सर्पस्थानापन्नं
६	४	मतससमीचीनम्	मतमसमीचीनम्
,,	७	त्वाज्ज्ञानेनै वनिवर्तते	त्वाज्ज्ञानेनैव निवर्तते
,,	२३	कल्पयद्विश्वाऽन्तरिक्ष'	कल्पयद्विश्वाऽन्तरिक्षश्च'
८	३	संस्कारायनात्म	संस्कारादनात्म
९	२०	काष्ठस्थितः	काष्ठस्थितः
,,	२१	कारविरोधी किन्तु	कारविरोधी नापि काष्ठविरोधी तद्दाहको वा किन्तु
,,	,,	अनिर्वचनीया वर्तिकाऽऽदो	अनिर्वचनीया वर्तिकाऽऽदो

Prof. Anoda Prasad Pandey Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

		अशुद्धम्	शुद्धम्
११	३	सत्त्वस्याधिकालवृत्तित्वमिति	सत्त्वस्याधिककालवृत्तित्वमिति
१२	१८	मतैव्यमिति	मतैक्यमिति
१२	२३	परो ज्ञानयोग्यता	परः किन्तु ज्ञानयोग्यता
१३	१८	श्रवणादेर्वैयर्थ्यं तन्न	श्रवणादेर्वैयर्थ्यमिति न
१४	६	पुरुषापराधविरामे तु	पुरुषापराधविगमे तु
”	१०	शतसंकुला	शतसङ्कुला
”	२१	हृदि स्थिता—	हृदि स्थिताः ।
१५	८	सामान्यनियमवाधेर्निवि-	सामान्यनियमबाधो निर्वि–
”	१५	वेगच्च	वेगवच्च
”	१६	संपत्स्य’	संपत्स्ये’
”	२१	शरीरमनुसंज्वरद्’	शरीरमनुसञ्ज्वरेद्’
१९	१०	‘यतो वाचो निवर्तन्ते नैव वाचा न मनसा’	‘यतो वाचो निवर्तन्ते’, ‘नैव वाचा न मनसा’
२०	३	श्रवणमननपूर्वक	श्रवणमननिदिध्यासन
२१	”	तत्र ज्ञानेऽपरोक्षत्वं	तत्र अद्वैताचार्याणां मते ज्ञानेऽपरोक्षत्वं
”	”	करणाधीनमिन्द्रियजन्यं	करणाधीनं किन्तु प्रमेयविशेष-निव-न्धनमिन्द्रियजन्यं
२२	६	भवेद्धि स’ इति श्रुतेः, आत्मानं	भवेद्धि स’ ‘आत्मानं

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal